# अमृतं बालभाषितम्

''पापा ! कोऽर्थः पापाशब्दस्य ?'' काचित्पञ्चवर्षीया कन्या स्वपितरमपृच्छत् – ''यो हि पापं करोति स पापा इत्येव मया गृहीतम्।''

''मा मैवं वद गुड्डि !'' तस्याः पितोवाच – ''पापा तु आंग्लभाषायाः पितृसम्बोधनशब्द एवं ज्ञातव्यस्त्वया ।''

''परन्तु भारतीया वयं, तदत्र तत्सम्बोधनपदस्य न कश्चिदभावो वर्तते।''

''गुड्डि ! सभ्यानां लोकानामेवं सम्बोधनं समीचीनम् ।''

''नाहं गुड्डीति तात ! न मे मातापि मम्मीति । ममी तु संग्रहालये मयाऽवलोकिता । ममाम्बा कथं ममीति कथ्यते ?''

''का वार्ताऽत्र चलिताऽस्ति ? अहमपि श्रोतुमभिलषामि ।'' माता पृच्छति।

''डार्लिंग ! एषा आवयोः दुहिता 'पापा पापं करोति, मम्मी च संग्रहालयस्य ममीति कथयति। न जाने केन कारणेन भ्रमितोऽस्याश्चित्तक्रमः । प्रतीयते यदस्य चत्वरस्य बालकानां कुप्रभावेण ग्रस्तेयम् ।''

''महोदय ! किन्न विचारयसि यत्क्वचिद् क्वचिदल्पवयस्केनापि कस्यचित् सत्यस्योद्घाटनं क्रियते । अमृतं बालभाषितमिति प्रसिद्धोक्तिरपि ज्ञातव्या । अतोऽद्यप्रभृति अहमम्बा, त्वञ्च पिता, इत्येवं सम्बोधनं भविष्यति । भारतीयां संस्कृतिं प्रति संकेतोऽस्याः सर्वभावेन ग्राह्यः ।